# रत्नावलीनाटिकायाः काव्यसौन्दर्यसमीक्षणम्

महानन्दतिमिल्सिना, विद्यावारिधिः

उपप्राध्यापकः

साहित्यविभागः

पिण्डेश्वरविद्यापीठम्

धरान-नेपालः

*timsinamahananda@gmail.com*

Analysis of Aestheticism in the Short Play, *Ratnaawali*
- by Dr. Mahananda Timalsina

The article analysis the aesthetic elements in the short play Ratnaawali by great Poet Harshavardana. The paper finds out the uses of various aesthetic elements sush as r*asa*, symbols, rhymes, quotations and feelings.

**लेखसारः**

*महाकविर्हर्षवर्द्धनविरचिता चतुःसङ्ख्यकेष्वङ्केषु विभक्ता 'रत्नावली' नाटिका विश्वसंस्कृतसाहित्ये सुपरिचिता वर्तते । अनेकै रसभावादिभिः समलङ्कृतायामस्यां नाटिकायां काव्यसौन्दर्यवर्धकानां रसोऽलङ्कारछन्दसाम्, सूक्तेश्च कमनीयं सौन्दर्यं चकास्ति । एतादृशैः साहित्यिकसौन्दर्यैर्नाटकमिदं देदीप्यमानं प्रतीयते, पठनेन भावकानां मन आह्लादयति । तादृशस्य वैशिष्ट्यपूर्णस्य प्रस्तुतनाटकस्य साहित्यिकसौन्दर्यविश्लेषणकेन्द्रिते प्रकृते लेखेऽत्र समुपलब्धानां काव्यतत्त्वानां समीक्षा विहिताऽस्ति । गुणात्मिकायामनुसन्धानपद्धत्यामाधारितेऽस्मिननुसन्धाने द्वितीयकस्रोतसा प्राप्तानां सामग्रीणां संयोजनं वर्तते । रत्नावली स्वगुणगणेन प्राचीनकालादेव प्रसिद्धा । शास्त्रीयपद्धतिमाश्रित्य रचितमिदं रूपकं दशरूपके प्रसिद्धं वर्तते । रत्नावली दृश्यकाव्यदृष्ट्याऽभिनन्दनीया वर्तते । अत्रार्थप्रकृतयः, कार्यावस्थाः, सन्धयश्च वस्तुविन्यासस्य साधनानि सन्ति । उदयनरत्नावल्योर्विवाहसम्पादनमेवास्य रूपकस्य प्रमुखमुद्देश्यमस्ति । अस्मिन् लेखे रत्नावल्यां कथावस्तुप्रयोगः, चरित्रचित्रणकौशलम्, अलङ्काररसादीनां प्रयोगस्थितिविषये विवेचनं*

*कृतमस्ति । रसालङ्कारादिप्रयोगदृष्ट्या काव्यमिदं सफलं संलक्ष्यते । वस्तुरसालङ्कारध्वनि-गुणसूक्त्यादीनां कमनीयत्वमस्य नाटकस्य महनीयं सौन्दर्यं वर्तते ।*

**शब्दकुञ्जिका -** अलङ्कारः, करुणः, शृङ्गारः, सूक्तिः ।

## विषयपरिचयः

पितुः प्रभाकरवर्द्धनाद् यशोमत्यां महाराजहर्षवर्द्धनो जनिं लेभे । अस्य भ्राता राज्यवर्द्धनः कनिष्ठा भगिनी च राज्यश्री आस्ताम् । दुर्दैववशाद् राज्यवर्द्धनः शशाङ्कनामकेन वङ्गीयनृपतिना छलेन निहतः । तदनन्तरं हर्षवर्द्धनो राजा बभूव । असौ कान्यकुब्जस्य प्रसिद्धः सम्राट् वर्तते । अस्य राजधानी स्थाण्वीश्वरनामकं स्थानमासीत् । हर्षवर्द्धनो धीरो वीरश्चतुश्च शासक आसीत् । अस्य राज्यकालः ६०६-६४७ खीष्टाब्दमासीत् । अस्यैव राज्यशासनकाले प्रसिद्धचीनयात्री ह्वेनसांगोनाम भारतमाजगाम, योऽनेन सत्कृतः । तस्यैव संसर्गेण हर्षो बौद्धधर्मस्यादरकरो जातः । असौ बाणभट्ट-मयूरप्रभृतिकवीन् आश्रयं प्रदाय संस्कृतसाहित्यस्य समृद्धये योगदानं कृतवानिति ज्ञायते । अस्य राज्ञो जीवनवृत्तविषये बाणभट्टरचितस्य हर्षचरिते विविधा सूचना प्राप्यते ।

हर्षवर्द्धनस्य रूपकत्रयं प्राप्यते - १. रत्नावली २. प्रियदर्शिका ३. नागानन्दञ्च । आदिमे द्वे नाटिके चरमञ्च नाटकमस्ति । केचन एतेषां ग्रन्थानां कर्तारं कविं धावकं मन्यन्ते । तेषामाशयानुसारेण हर्षनृपो धावकं नामकं कविं द्रव्यादीन् प्रदाय तस्य ग्रन्थान् क्रीतवान् इति । मम्मटस्य काव्यप्रकाशेऽपि ‘श्रीहर्षादेर्धावकादीनामिव धनम्’ इत्युल्लिखितं प्राप्यते । धावकाय बाणाय दिवाकराय वा विदुषेऽसौ बहुधनं दत्तवानिति कथनेन तदीयं विद्वत्प्रियत्वमात्रं सिद्धयति न परकीयकृतिकेतृत्वम् । हर्षवर्द्धनो दानशील आसीत् । निर्धनेषु धनप्रदाने धार्मिकानुष्ठाने विदुषां सम्माने चास्य ख्यातिर्विस्तारिताऽऽसीत् ।

इतिहासे बहवो हर्षनामानो नृपतयः श्रुतास्तत्कतमोऽयं रूपकत्रयप्रयोता हर्ष इति सम्भवति प्रश्नः । तत्र ११३३-११२५ खीष्टाब्दवर्ती कश्मिरराजः हर्षोऽमीषां रूपकाणां प्रणेतेति कथनं न सम्यक्, यतः अष्टमशतकान्तभागे वर्तमानेन नृपतिययापीडमन्त्रिणा दामोदरेण स्वीये कुट्टिनीमते रत्नावलीश्लोक उद्धृतोऽतो रत्नावलीकर्तुरष्टमशतक- पूर्ववर्तित्वं निश्चितम् । त्रिष्वपि रूपकेषु प्रस्तावनायां हर्षस्य नाम स्मर्यते, रत्नावलीप्रियदर्शिकयोरेकं पद्यं समानम्, प्रियदर्शिकानागानन्दयोः समाना शैली संलक्ष्यते, एतेनैषामेककर्तृत्वं सिद्धं भवति (रामचन्द्रमिश्र : संस्कृतसाहित्येतिहासः ११४) । अत्र हर्षवर्द्धनस्य रत्नावलीनाटिकाया कथावस्तु-चरित्र-रसालङ्कारादीनां काव्यसौन्दर्याधारेण समीक्षणं विधीयते ।

## समस्याकथनम्

रत्नावलीनाटिकायां विविधकाव्यसौन्दर्यामाधारेण समीक्षणसन्दर्भेऽस्मिन् लेखे निम्नाङ्कित‌ाः समस्याः समागताः सन्ति -

क. रत्नावलीनाटिकायाः कथावस्तुविन्यासः कीदृशो वर्तते ?

ख. रत्नावलीनाटिकायां चरित्रविन्यासालङ्काररसाणाञ्च प्रयोगः कीदृशो विलोक्यते ?

## उद्देश्यम्

अध्ययनमेतत् निम्नाङ्कितयो उद्देश्ययोः केन्द्रितमस्ति -

क. रत्नावलीनाटिकायां कथावस्तुविन्यासस्याध्ययनम्,

ख. रत्नावलीनाटिकायां चरित्रविन्यासालङ्काररसाणाञ्च प्रयोगसमीक्षणम्,

## अध्ययनविधिः प्रक्रिया च

अध्ययनमेतत् गुणात्मिकायामनुसन्धानपद्धत्यामाधारितमस्ति । अत्र पुस्तकालयीयानां सामग्रीणां प्रयोगो विद्यते । पौरस्त्यकाव्यशास्त्रिभिः प्रतिपादितसिद्धान्तस्य पुस्तकान्यप्यत्र सामग्रीरूपेण संयोजितानि विद्यन्ते । रत्नावलीनाटिकाविषये लिखितानि पुस्तकानि, विचाराः, लेखाश्चात्र सङ्कलनं विधाय विश्लेषणं कृतमस्ति । सामग्रीणां व्याख्याविश्लेषणेऽत्र वर्णनात्मकस्य व्याख्यात्मकस्य च विधेः प्रयोगो विहितोऽस्ति ।

अस्मिन् अध्ययने रत्नावलीनाटिकाया वस्तु-नेता-रसालङ्कार-छन्दसामाधारेणैव समीक्षणं कृतमस्ति । सकलानां काव्यतत्त्वानां सूक्ष्मरूपेणाध्ययनं विधातुमसमर्थताप्रकाशनमेवास्य लेखस्य सीमा वर्तते ।

## पूर्वकार्यसमीक्षा

रत्नावलीनाटिकाया विविधविषयमवलम्ब्याध्ययनमनुसन्धानं जातमस्ति । एतानि पूर्वकार्याणि क्रमिकरूपेणात्र सङ्क्षेपेण प्रस्तूयन्ते -

क. रमाशङ्कर त्रिपाठी *‘रत्नावलीनाटिका ’* (ई.१९७६) इति पुस्तकस्य ‘प्रस्तावना’ इति शीर्षकयुते भूमिकाखण्डे हर्षवर्द्धनस्य रत्नावलीनाटिकायाश्च विषये परिचर्चां दधाति । समीक्षकोऽनुवादकस्त्रिपाठी प्रस्तौति यत् - रत्नावली हर्षस्य यशस्विनी कृतिर्वर्तते । हर्षो न केवलं महाकवीनामाश्रयदाता अपि तु स्वयमपि महाकवि आसीत् । अस्य त्रिष्वपि रूपकेषु शब्दावली-वाक्यविन्यास-घटनानां समुचितविन्यासो वर्तत इत्यादिना विवेचनं विदधाति (त्रिपाठी, ई.१९७६, पृ.२) ।

ख. आचार्य बलदेव उपाध्याय *'संस्कृत साहित्य का इतिहास'* (ई.१९९२) इति पुस्तकस्यैकादशपरिच्छेदस्य 'हर्षवर्धन' इति शीर्षके रत्नावली नाटिकाया अपि चर्चा विदधाति । असौ कथयति यत् - रत्नावली संस्कृतसाहित्यस्य प्रथमा सफला नाटिका वर्तते । शास्त्रीयपद्धत्या नाटकप्रकरणयोर्मिश्रणादुद्भूता नाटकीया रचनैव नाटिका वर्तते । अस्यां नायक इतिहासे परम्परायाञ्च प्रख्यातः प्रयुज्यते । अस्यां नाटिकायां कालिदासीयानां नाटकानां प्रचुरः प्रभावो विलोक्यत इति विषयं प्रतिपाद्य समीक्षको बलदेवः रत्नावलीनाटिकायां सन्दर्भं प्रस्तौति ।
(उपाध्याय, ई.१९९२, पृ.५२७) ।

ग. डा.राजवंश सहाय *'संस्कृत साहित्य-कोश'* (ई.२००२) इति कोशस्य 'हर्षवर्द्धन' इति शीर्षकेऽस्या नाटिकाया वैशिष्ट्यं प्रतिपादयति, यत् - रत्नावली संस्कृतसाहित्यस्य प्रसिद्धा नाटिका वर्तते । अस्या नाटिकाया नैकानि उदाहरणानि नाट्यशास्त्रीयेषु ग्रन्थेषु प्राप्यन्ते । अत्र वत्सराजस्योदयनस्य रत्नावल्याश्च प्रणयप्रसङ्गस्य वर्णनं वर्तते । हर्षस्य रचनायां माधुर्यप्रसादगुणयोः संयोजनं प्राप्यते । अस्य काव्येषु शब्दार्थालङ्काराणां सुरुचिपूर्णं वर्णनं दृश्यते । अस्य काव्यस्य भाषायां रसानुकूलप्रवाहोऽवलोक्यते । कविना रसमयेन वर्णनेन प्राकृतिकस्य सौन्दर्यस्याभिव्यक्तिः प्रकटिता वर्तत इत्यादिनास्मिन् कोशे प्रतिपादितं वर्तते (राजवंश, ई.२००२, पृ.६८२) ।

घ. आचार्यरामचन्द्र मिश्रः *'संस्कृतसाहित्येतिहासः'* (ई.२०१०) इति पुस्तकस्य 'हर्षनृपतिः' इति शीर्षके हर्षवर्द्धनस्य विषये तस्य रत्नावलीनाटिकाया विषये च विस्तरेणैव प्रतिपादयति । कथयति च - श्रीहर्षस्य काव्यशैली सरला सुबोधा वैदर्भीपरिष्कृता । वर्णनस्य स्वाभाविकता विशदता च हृदयमाकर्षतः । यद्यप्यस्य कृतौ सूक्ष्मेक्षिकाया उत्प्रेक्षायाश्च वैरल्यमेव, तथापि प्रसादगुणो नितान्तहृदयावर्जकः । हर्षस्य रत्नावली स्वीयेन गुणगणेन प्राचीनकालादेव प्रसिद्धा । शास्त्रीयपद्धतिमाश्रित्य प्रणीतमिदं रूपकमिति हेतुना दशरूपकेऽतीवादरोऽस्या जातः । साहित्यदर्पणेऽपि सन्धितदङ्गानां निरूपणस्य प्रसङ्गे रत्नावली प्रचुरमादृता । श्रीहर्षः आदर्शभूतं कथानकमाश्रित्य भव्यं रूपकमिदं कृतवान् । समीक्षकोऽस्य सर्वमनोहरां वर्णनचातुरीमुदाहरति यत् -

किं पद्यमस्य रुचं न हन्ति नयनानन्दं विधत्ते न किं
वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् ।
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्गतो
दर्पः स्यादमृतेन चेदिह तदप्येवास्ति बिम्बाधरे ॥ (रत्नावली, ३ : १३)

इत्यादिना समीक्षको रामचन्द्रमिश्रः हर्षवर्द्धनस्य रत्नावलीसम्बद्धं विविधविषयं प्रकाशयति (मिश्रः, ई.२०१०, पृ.११५) ।

ङ. डा.रमेशचन्द्रशुक्लः *‘प्रबन्धरत्नाकरः’* (वि.सं.२०२३) इति पुस्तकस्य ‘रत्नावली’ इत्युपशीर्षके रत्नावलीनाटिकाया विषये विवेचनं विदधाति यत् - शास्त्रीयपद्धतिमाश्रित्य विरचितेषु दृश्यकाव्येषु सम्राजो हर्षवद्धनस्य रत्नावली नाम दृश्यकाव्यमेकं श्रेष्ठं दृश्यकाव्यमस्ति । तत्श्रेष्ठतायाः कारणमिदमस्ति यत् तत्र तेषामुदाहरणानां सङ्ख्याधिकतमा वर्तते यानि नाट्यशास्त्रं कस्यचन रूपकस्य विशिष्टतायाः प्रदर्शनाय अपेक्षते । रत्नावली नाट्यकलादृष्ट्यैव नोत्तमा अपि तु सा दृश्यकाव्यदृष्ट्यापि एकाभिनन्दनीया कृतिर्वर्तत इत्यादिना रत्नावलीनाटिकां विवेचयति (शुक्लः, ई.२०२३, पृ.३७८) ।

च. घटराजभट्टराई *‘संस्कृतका अमर साहित्यकार’* (वि.सं.२०५५) इति पुस्तकस्य ‘नाटककार हर्षवर्द्धनः’ इति शीर्षके हर्षवर्द्धनस्य नाट्यवैशिष्ट्यं प्रकटयति, यथा - अस्य नाटिकायां कालिदासस्य मालविकाग्निमित्रस्य प्रभावोऽवलोक्यते । कलात्मकदृष्ट्या नाटिकेयं सुन्दरं प्रतीयते । संस्कृतनाट्यकाव्यस्येतिहासेऽनेन महत्त्वपूर्णं स्थानं प्राप्तम् । असौ विद्वान् कवित्वप्रतिभया सम्पन्नश्चासीदिति (भट्टराई, वि.सं.२०५५, पृ.१०३) ।

रत्नावलीनाटिकामङ्गीकृत्य नैकैः समीक्षकैर्विविधेषु विषयेषु विस्तरेण समीक्षणं कृतं दृश्यते । मूलतः समीक्षका नाटिकाया सामान्यरूपेण विवेचने केन्द्रिताः प्राप्यन्ते । अस्यां नाटिकायां विद्यमानानां कथावस्त्वलङ्कारसविषये विशदं विवेचनं कुत्रापि नैवावलोकितम्। अतो लेखोऽयं नवीनानुसन्धानप्रतिपादने समर्थो वर्तते ।

## विषयविश्लेषणम्

### रत्नावलीनाटिकायाः कथावस्तु

***पूर्वकथा*** **-** वत्सदेशस्य राज्ञः उदयनस्य मन्त्रिणा यौगन्धरायणेन सिद्धवचनं श्रुतं यत्, यः सिंहलनृपस्य विक्रमबाहोः पुत्र्या रत्नावल्या सह विवाहं करिष्यति स चक्रवर्ती राजा भविष्यतीति । एतत्सिद्धवाक्यमाधारीकृत्य यौगन्धरायणेन राज्ञ उदयनस्य कृते रत्नावली याचिता परमुदयनस्य पत्न्यां वासवदत्तायां विद्यमानायां राज्ञा रत्नावलीप्रदानविषयोऽस्वीकृतः । तदनु यौगन्धरायेन वासवदत्तया कृतस्यात्मदाहस्य समाचारः प्रेषितः । समाचारं श्रुत्वा राजा पुत्रीप्रदाने तत्परो जातः । असौ मन्त्रिभिः

सह स्वपुत्रीमुदयनसमक्षं कौशाम्बीदेशं प्रेषितवान् । समुद्रमार्गे नौका भग्ना जाता, परं दैववशात् रत्नावली सुरक्षिता । तदनु कौशाम्बीदेशस्य बणिजः साहाय्येन रत्नावली यौगन्धरायणसन्निधौ प्रापिता ।

*प्रथमोऽङ्कः* - प्रथमाङ्कस्य प्रारम्भे यौगन्धरायणः पूर्वविहितायां घटनायां दैवस्यानुकूल्यं स्मरति । समुद्रमार्गे नौकायां भग्नायामपि रत्नावल्या आगमनेऽसौ प्रसन्नो दृश्यते । ततो यौगन्धरायणः सागरिकेति छद्मनाम्ना रत्नावलीं वासवदत्ताया सेविकारूपेण नियुङ्क्ते । तदा राजा उदयनो वसन्तोत्सवं द्रष्टुं प्रासादोपरि वर्तत इति नेपथ्यात् कलकलध्वनिः समागच्छति । कौशाम्बीदेशे सर्वेऽपि वसन्तोत्सवे निमग्ना जायन्ते । कामदेवपूजने राजा मकरन्दोद्याने गच्छति, वासवदत्तापि प्राप्नोति । सा सागरिकां तत्र नेतुं न वाञ्छति परं सागरिकापि कामपूजनाय पुष्पचयनेच्छया तत्र गच्छति । वासवदत्ता कामपूजनानन्तरमुदयनस्य पूजां करोति, तत्र सागरिकां दृष्ट्वा राजा आश्चर्यान्वितो जायते। वैतालिकेन कृताया राज्ञः स्तुत्या सागरिका स्वपतिमुदयनं जानाति, साभिलाषा तं पश्यति च । अस्मिन्नङ्के मदनमहोत्सवस्य वर्णनमस्ति । सर्वत्रानन्दमयं वातावरणं चित्रितमस्ति ।

*द्वितीयोऽङ्कः* - अत्र सागरिकाया कामावस्थायाश्चित्रणमस्ति । सा कदलीगृहे राज्ञो चित्रं निर्माति । सख्या सुसङ्गतया पृष्टा सा रहस्यं निगूहति परं विनम्रतया पृष्टा सा सखीं सुसङ्गतां सकलामपि पीडां श्रावयति । पिञ्जरे स्थिता सारिका अनयोर्वार्तालापं श्रृणोति । अत्रान्तरेऽश्वशालातः निर्गतो वानरोऽन्तःपुरक्षेत्रेषु भ्रमति । वानरः सारिकायाः पिञ्जरद्वारमुद्घाटयति, तदनु सा उड्डीय बकुलवृक्षे प्राप्नोति, अनन्तरं मकरन्दोद्यानं गतौ राजविदूषकौ सारिकाया आलापं श्रृणुतः । ततस्तौ सारिकामनुसृत्य सागरिकायाः कामदशासूचितानि कमलपत्रादीनि वस्तूनि पश्यतः । तत्र सुसङ्गता राज्ञा सह सागरिकाया मेलनं कारयति । राजा सागरिकाया हस्तं स्पृशति । वासवदत्तापि काञ्चनमालया सह तत्रोद्याने समागच्छति । सा चित्रफलके राज्ञः सागरिकायाश्च चित्रं विलोक्य कुपिता जायते। राज्ञो विदूषकस्य चानुनयेनापि सा प्रसन्ना न भवति, शिरोवेदनया छलेन वासवदत्ता निर्गच्छति । राजविदूषकावपि तामनुनेतुं तत्रैव गच्छतः ।

*तृतीयोऽङ्कः* - राजा सागरिकायामनुरक्तो जायते । विदूषकः सुसङ्गतामाध्यमेन राज्ञः सागरिकायाश्च सम्मेलनस्य योजनां निर्माति, परमिमां सकलामपि योजनां काञ्चनमाला जानाति । तदनु सागरिकाया वेशेण काञ्चनमायला साकं वासवदत्ता सङ्केतितं स्थानं गच्छति । राजा तां सागरिकामेव मत्वा

सम्बोधयति, तस्याः सौन्दर्यस्य वर्णनञ्च विदधाति, क्रुद्धा वासवदत्ता स्वकीयं वास्तविकं रूपं प्रदर्शयति। ततो राजा क्षमां याचते, वासवदत्ता तस्य वचनमविगणय्य निर्गच्छति । सागरिकाऽपि वासवदत्ताया वेशेण मकरन्दोद्याने गच्छति, राज्ञा सह मेलनस्य योजनां रचयति । राजापि तत्रागच्छति, सागरिकां लब्ध्वा तां प्रति प्रगाढं प्रणयं प्रदर्शयति । तदनु वासवदत्तापि तत्रैव गच्छति, सा तयोः प्रणयं दृष्ट्वा क्रुद्धा विलोक्यते । सा लतापाशेन बध्वा सागरिकां राजभवनं नेतुं विदूषकं निर्दिशति ।

*चतुर्थोऽङ्कः* वासवदत्ता सागरिकां कारागृह् क्षिपति । सागरिका जीवनं निरर्थकं स्वीकृत्य नैराश्यमाप्नोति । ततः स्वपित्रा प्रदत्तां रत्नमालां कस्मै अपि ब्राह्मणाय दातुं सखीं सुसङ्गतां समर्पयति । सा ब्राह्मणमन्विष्य विदूषकाय रत्नमालां ददाति । विदूषको राजसमक्षं गत्वा सागरिकाया दशाविशेषं ज्ञापयति । तदैव रुमण्वान् इति सेनापतिना युद्धे कोसलनरेशं मारयित्वा कोशलदेशं विजितवान् यति समाचारः श्रूयते । तत्रोज्जयिनीतः समागत ऐन्द्रजालिकः स्वकीयं खेलं प्रदर्शयितुमनुमतिं याचते । राजा वासवदत्तया सहैव स्थित्वाऽऽश्चर्यजनकं खेलं पश्यति । तत ऐन्द्रजालिकस्य निर्देशानुसारेण अमात्यो वसुभूतिर्राजकुमारी रत्नावली समुद्रे निमग्ना इति कथां श्रावयति, तदैवान्तःपुरे अग्निः प्रज्वलति । तदनु वासवदत्ता कारागृहे बन्धितायाः सागरिकायाः प्राणरक्षार्थं राजसमक्षमनुरुणद्धि । राजा भवनान्तरे प्रविश्य अग्नितः सागरिकामुद्धरति । सागरिकाया आकृतिः राजकुमार्या रत्नावल्यायाः सदृशी वर्तत इति कथयन् अमात्यो वसुभूतिरस्या विषये पृच्छति । अन्ते सागरिका वासवदत्तायाः मातुलस्य पुत्री रत्नावली एव वर्तत इति रहस्यं सर्वे जानन्ति । ततो यौगन्धरायणस्तत्रागत्य समग्रां योजनां घटनां च वर्णयति । तदनु वासवदत्ताऽपि उदयनेन सह स्वभगिन्या वासवदत्ताया विवाहं कारयति ।

**चरित्रचित्रणम्**

रत्नावलीनाटिकायामुदयन- रत्नावली- वासवदत्ता- यौगन्धरायणप्रभृतीनां पात्राणां प्रयोगोऽवलोक्यते । अत्र प्रयुक्तानां प्रमुखपात्राणां चरित्रचित्रणमधः प्रस्तूयते ।

***उदयनः -*** वत्सराज उदयन रत्नावलीनाटिकाया नायकोऽस्ति । नाटिकायां धीरललितनायकरूपेणास्या चित्रणं वर्तते । अस्य राज्यं सचिवाधीनमस्ति । तथापि सचिवा राज्ञः परामर्शं विना किमपि न कुर्वन्ति स्म । साम्रज्येऽस्याधिपत्यमासीत् । उदारहृदयोऽसौ उत्सवे तल्लीनो दृश्यते । उदयनो राजा कलाप्रियो

रसिकोऽस्ति । शत्रोः पराक्रमस्याप्यसौ प्रशंसनं करोति । नायिकायाः सागरिकायाः सौन्दर्ये राजा मोहितो जायते । सागरिकया सह राज्ञः प्रेमसम्बन्धं ज्ञातवत्या राज्ञ्या वासवदत्तायाश्चरणयोः प्रणिपत्य राजा क्षमां याचते, तया सह स्वस्य कृत्रिमः प्रेमभावोऽस्तीति वासवदत्तां कथयति । परन्त्वसौ सागरिकां हृदयेनैव वाञ्छति । अस्याः प्राणरक्षार्थं बह्नावपि धावति । राजा सागरिकां विना स्वकीयानां प्राणानामपि निरर्थकत्वं स्वीकरोति । सुकोमलहृदयस्यास्य व्यवहारोऽपि सुसंस्कृतः शिष्टश्च वर्तते ।

***रत्नावली (सागरिका)*** - सिंहलनरेशस्य विक्रमबाहोः सुपुत्री रत्नावली अस्या नाटिकाया नायिकाऽस्ति । अस्या एव नाम्ना नाटिकाया नाम निर्धारितमस्ति । नाटिकायां सर्वत्रेयं सागरिकानाम्ना व्यवहृयते। इयमतीव सुन्दरी अस्ति । राजा उदयनोऽस्याः सौन्दर्यस्य वर्णनं करोति, यत्-

दृशः पृथुतरीकृता जितनिजाब्जपत्रत्विष-
श्चतुर्भिरपि साधु साध्विति मुखैः समं व्याहृतम् ।
शिरांसि चलितानि विस्मयवशाद् ध्रुवं वेधसा
विधाय ललनां जगत्त्रयललामभूतामिमाम् ॥ (रत्ना.२.१६)

रत्नावली मुग्धा नायिका वर्तते । इय राजानमुदयनं कामदेवं मत्वा पूजयति । चित्रकलायामियं निपुणाऽस्ति । आभिजात्यगुणमण्डितायामस्यां आत्मसम्मानस्य भावना विद्यते । रत्नावल्यां भय-लज्जा-प्रेम-सन्तोषादिभावना दृश्यन्ते । इयं स्वकीयेन जीवनेन दुःखिता वर्तते । राजानमुदयनं प्राप्तुमियं तस्योपवने गच्छति, राजानमप्राप्येयं नैराश्येन मरणेच्छां च प्रदर्शयति ।

***वासवदत्ता*** - वासवदत्ता राज्ञः उदयनस्य राजमहिषी वर्तते । इयं राजानमतिशयं सम्मानं करोति । वासवदत्तायाः प्रणयकोपे राजा अस्या एव चरणयोर्निपतति । वासवदत्ता बुद्धिमती नीतिप्रवीणा च नारी संलक्ष्यते । इयं राज्ञः सन्निधौ सागरिकाया आगमनेन क्रुद्धा जायते, तां निवारयति च । स्वकुलस्य कृते, भर्तुः प्रतिष्ठायाः कृते च वासवदत्ता समर्पिता वर्तते । यदा रत्नावल्या सह उदयनस्य विवाहो भविष्यति तदा चक्रवर्ती सम्राट् अपि जनिष्यतीति श्रुत्वा सा हर्षातिरेकेण स्वयमेवोदयनस्य हस्तयोः रत्नावलीं समर्पयति, प्रेमपूर्वकं व्यवहारं विधातुं च सा राजनमुपदिशति । वासवदत्ता स्वपितृकुलं प्रति अत्यादरा दृश्यते, उज्जयिनीतः समागतमैन्द्रजालिकमियं बहुसम्मानं विदधाति । इयम् आदर्शनारी वर्तते । वासवदत्ता नाटिकायाः प्रेम्णः त्यागस्य कुलीनतायाश्च प्रतिमूर्तिरिव विद्यते ।

**रसयोजना**

रत्नावलीनाटिकायां प्रमुखरूपेण शृङ्गाररसस्य प्रयोगो विलोक्यते । एवमेवात्र हास्यकरुणादीनां रसानामपि स्थाने स्थाने प्रयोगः संलक्ष्यते । अत्र प्रधानरसाणां स्थितिः प्रदर्श्यते ।

***शृङ्गाररसः*** - रत्नावलीनाटिकायां सम्भोगशृङ्गाररसस्य प्राधान्यमस्ति । अत्राङ्गरूपेण विप्रलम्भशृङ्गाररसस्योपस्थितिरपि यत्र तत्र द्रष्टुं शक्यते । नाटिकायाः प्रथमेऽङ्के वसन्तोत्सवस्य कामपूजनस्य च दृश्ययोजना शृङ्गारिकी वर्तते । सागरिकायाः सौन्दर्यवर्णनेऽपि शृङ्गारस्य प्राबल्यमस्ति ।

नाटिकायामालम्बनविभावरूपेण नायिकाया वर्णनं कृतमस्ति -

विधायापूर्वपूर्णेन्दुमस्या मुखमभूद्ध्रुवम् ।
धाता निजासनाम्भोजविनिमीलनदुःस्थितः ॥ (१ : १०)

रत्नावलीनाटिकायाः स्थाने स्थाने राजा उदयनो विदूषकसमक्षं सागरिकायाः यौवनसंवलितस्य सौन्दर्यस्य वर्णनं विदधाति । यथा -

'परिम्लानं पीनस्तनजघनसङ्गादुभयतः ।' (२ : १३)
'स्थितमुरसिविशालं पद्मिनीपत्रमेतत्.....।
स्तनयुगपरिणाहं मण्डलाभ्यां ब्रवीति ॥' (२ : १४)
'खेदं करिष्यति गुरुर्नितरां नितम्बः ॥' (२: १७)

नाटिकाया द्वितीयेऽङ्के सुसङ्गतामाध्यमेन नायकनायिकयोः संयोजनं जायते । नायिकायाः बाहुस्पर्शस्य सुखेन राजा आनन्दमनुभवति, यथा-

श्रीरेषा पाणिरप्यस्याः पारिजातस्य पल्लवः ।
कुतोऽन्यथा स्रवत्येषः स्वेदच्छद्मामृतद्रवः ॥ (२ : १८)

नाटिकायाः तृतीयेऽङ्के नायकेन सह नायिकायाः पुन संयोगो जायते । द्वावपि समालिङ्गने निमग्नौ जायेते, यथा -

अलमलमतिमात्रं साहसेनामुना ते
त्वरितमयि विमुञ्च त्वं लतापाशमेतम् ।
चलितमपि निरोद्धुं जीवितं जीवितेशे

क्षणमिह मम कण्ठे बाहुपाशं निधेहि ॥ (३ : १७)

उदयनसागरिकयोर्विरहव्यथावर्णने विप्रलम्भशृङ्गारस्य परिपोषः प्राप्यते । नाटिकाया तृतीयाङ्कस्य प्रारम्भ एव नायिकाया विरहावस्थायाश्चित्रणं कृतमस्ति । कदलीगृहे गता नायिका कामातुरा दृश्यते । यथा -

दुर्लभजनानुरागो लज्जा गुर्वी परवश आत्मा ।

प्रियसखि विषमं प्रेम मरणं शरणं नवरमेकम् ॥ (२ : १)

***हास्यरसः*** - हर्षवर्द्धनेन रत्नावलीनाटिकायां हास्यरसस्यापि प्रयोगो विहितः । अत्र विदूषकस्य कथने हास्यरसस्य प्रयोगाधिक्यं दृश्यते । विदूषकः स्वमुखाकृतिना वचनेन परिधानेन च दर्शकेषु हास्यभावं जनयति । प्रथमेऽङ्के वसन्तोत्सवस्यावसरे विदूषकः चेटीगणसमक्षं गत्वा नृत्येन गीतेन च हास्यभावं प्रकटयति ।

***करुणरसः*** - रत्नावलीनाटिकायां करुणरसस्याधिकं चित्रणं दृश्यते । वासवदत्तया पीडिता रत्नावली लतापाशेन बद्धा सती आत्महत्यायाः प्रयत्नं विदधाति । अन्तःपुरमग्निना प्रज्वलिते दग्धायाः रत्नावल्याश्चित्रणेऽपि करुणरसः सञ्जायते, सा कथयति च - वरमिदानीं स्वयमेवात्मानमुद्बध्योपरता न पुनर्ज्ञातसङ्केतवृत्तान्तया देव्या परिभूताऽस्मि । तद्यावदहमशोकपादपं गत्वा यथासमीहितं करिष्यामि ( ३: १६ पूर्वम्) ।

***भयानकरसः*** - रत्नावल्या चतुर्थेऽङ्के अन्तःपुरेऽग्निः प्रज्वलिते भयानकरसस्य प्रयोगोऽस्ति । यथा -

हर्म्याणां हेमशृङ्गश्रियमिव निचयैरर्चिषमादधानः

सान्द्रोद्यानद्रुमाग्रग्लपनपिशुनितात्यन्ततीव्राभितापः ।

कुर्वन्क्रीडामहीध्रं सजलजलधरश्यामलं धूमपातै-

रेष प्लोषार्तयोषिज्जन इह सहसैवोत्थितोऽन्तःपुरेऽग्निः ॥ (४: १४)

नाटिकाया द्वितीयेऽङ्के वानरस्य वर्णनेऽपि भयानकरसो विद्यते । यथा -

नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा-

मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः ।

पर्यन्ताश्रयिभिर्निजस्य सदृशं नाम्नः किरातैः कृतं

कुब्जा नीचतयैव यान्ति शनकैरात्मेक्षणाशङ्किनः ॥ (२ :३)

रत्नावल्या चतुर्थेऽङ्के विजयवर्मकोसलाधीशयोः सङ्ग्रामवर्णने वीररसस्याभिव्यक्तिः सुन्दरतमा प्रतीयते ।

**अलङ्कारयोजना**

रत्नावलीनाटिकायां विविधानां शब्दार्थालङ्काराणां संयोजनं प्राप्यते । यथा -

क. रूपकम् - 'देवि त्वन्मुखपङ्कजेन शशिनः शोभातिरस्कारिणा ।' (१ : २६)

'लीलावधूतपद्मा कथयन्ती पक्षपातमधिकं नः ।' (२ : ९)

ख. उपमा - 'मानसमुपैति केयं चित्रगता राजहंसीव ।' (२ : ९)

'परिपाण्डुना मुखेन प्रियमिव हृदयस्थितं रमणी ।' (१ : २५)

ग. उत्प्रेक्षा - 'लीयन्ते मुकुलान्तरेषु शनकैः सञ्जातलज्जा इव ।' (१ : २६)

सौन्दर्यवर्णक्रमे कविः काकुध्वनिमाध्यमेनैकत्रैव सकलमपि सौन्दर्यमभिव्यञ्जयति, यथा -

'किं पद्मस्य रुचं न हन्ति नयनानन्दं विधत्ते न किं
वृद्धिं वा झषकेतनस्य कुरुते नालोकमात्रेण किम् ।
वक्त्रेन्दौ तव सत्ययं यदपरः शीतांशुरभ्युद्गतो
दर्पः स्यादमृतेन चेदिह तदप्यास्ति बिम्बाधरे ॥' (२ : १३)

अस्मिन् श्लोके प्रतीपालङ्कारेण सह श्लेषरूपकोपमालङ्काराणां सौन्दर्यं हृदयाह्लादकमनुभूयते ।

**छन्दो योजना**

रत्नावलीनाटिकायां भावानुकूलानां छन्दसां प्रयोगोऽवाप्यते । अत्र पञ्चदशप्रकारकाणां छन्दसां प्रयोगो दृश्यते । ते च - १. शालिनी २. हरिणी ३. वसन्ततिलका ४. शिखरिणी ५. पृथ्वी ६. उपजाति ७. आर्या ८. अनुष्टुप् ९. प्रहर्षिणी १०. मालिनी ११. स्रग्धरा १२. शार्दूलविक्रीडित १३. इन्द्रवज्रा १४. उपेन्द्रवज्रा १५. पुष्पिताग्रा ।

एतेषां कतिपयानामुदाहरणमत्र प्रस्तूयते -

शार्दूलविक्रीडितम् -

पादाग्रस्थितया मुहुः स्तनभरेणानीतया नम्रतां
शम्भोः सस्पृहलोचनत्रयपथं यान्त्या तदाराधने ।
ह्रीमत्या शिरसीहितः सपुलकस्वेदोद्गमोत्कम्पया

विश्लिष्यन्कुसुमाञ्जलिर्गिरिजया क्षिप्तोऽन्तरे पातु वः ॥ (१ : १)

अनुष्टुप् - अनङ्गोऽयमनङ्गत्वमद्य निन्दिष्यति ध्रुवम् ।
यदनेन न सम्प्राप्तः पाणिस्पर्शोत्सवस्तव ॥ (१ : २३)

वसन्ततिलका - दृष्टिं रुषा क्षिपसि भामिनि यद्यपीमां
स्निग्धेयमेष्यति तथापि न रुक्षभावम् ।
त्यक्त्वा त्वरां व्रज पदस्खलितैरयं ते
खेदं करिष्यति गुरुर्नितरां नितम्बः ॥ (२ : १७)

शिखरिणी - समारूढा प्रीतिः प्रणयबहुमानादनुदिनं
व्यलीकं वीक्ष्येदं कृतमकृतपूर्वं खलु मया ।
प्रिया मुञ्चत्यद्य स्फुटमसहना जीवितमसौ
प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति ॥ (३ : १५)

**सूक्तिसौन्दर्यम्**

रत्नावलीनाटिकायां विविधानां सूक्तीनां सान्दर्भिकः प्रयोगः समवलोक्यते । यथा -

- अचिन्त्यो हि मणिमन्त्रौषधीनां प्रभावः ।
- आत्मा किल दुःखमालिख्यते ।
- इयमनम्रा वृष्टिः ।
- ईदृशं रूपं मनुष्यलोके न पुनर्दृश्यते ।
- एषा खलु त्वयाऽपूर्वा श्री समासादिता ।
- कष्टोऽयं खलु भृत्यभावः ।
- किं पुनः साहसिकानां पुरुषाणां न संभाव्यते ।
- घुणाक्षरमपि कदापि संभवत्येव ।
- दुरवगाहा गतिर्दैवस्य ।
- न कमलाकरं वर्जयित्वा राजहंस्यन्यत्राभिरमते ।
- न खलु सखीजने युक्त एवं कोपानुबन्धः ।
- प्रकृष्टस्य प्रेम्णः स्खलितमविषह्यं हि भवति ।
- मद्भाग्योपचयादयं समुदितः सर्वो गुणानां गणः ।

## निष्कर्षः

कविर्हर्षवर्द्धनः संस्कृतसाहित्यस्य विशिष्टा प्रतिभा वर्तते । अस्य नाट्यकाव्येषु रसभावगुणालङ्कारसूक्त्यादीनां काव्यसौन्दर्याणां समुचितो विन्यासः प्राप्यते । कवेरस्य काव्यमिदं सहृदयहृदि परममानन्दं जनयति । नाटकेषु विविधालङ्कारसंयोजनेऽसौ सिद्धहस्तो विद्यते । शब्दार्थालङ्काराणां कुशलेन संयोजनेनास्य नाटकं मनोहरं प्रतीयते । रत्नावलीनाटिकायां चत्वारोऽङ्काः सन्ति । राज्ञ उदयनस्य रत्नावल्याश्च प्रणयविषयप्रतिपादने काव्यमेतत् रचितमस्ति । विविधानां रसानामौचित्यपूर्वकेण संयोजनेन नाटिकेयं श्रुतिमधुरा आनन्दसन्दोहप्रदायिका चानुभूयते । अत्र पौरस्त्यकाव्यशास्त्रिभिः प्रतिपादितानां नैकानामलङ्काराणां रसध्वन्यादीनां सान्दर्भिकं संयोजनं संलक्ष्यते । विषयवस्तूनां सन्दर्भानुसारेणात्र उपमा-रूपकार्थान्तरन्यास-काव्यलिङ्गप्रभृतीना-मलङ्काराणां प्रयोगो विलोक्यते । अत्र विषयानुकूला भाषा, विषयानुकूलानि चरित्राणि च दृश्यन्ते । नाट्यतत्त्वदृष्ट्या रत्नावलीनाटिकायाः समीक्षणमिति शीर्षकं भाव्यनुसन्धानाय विषयो भवितुं शक्नोति ।

## सन्दर्भसामग्रीसूची


उपाध्यायः, बलदेव (ई.१९९२) *संस्कृत साहित्यका इतिहास* (दशम सं.), शारदा निकेतन ।

आनन्दवर्धनः (ई.२००६), *ध्वन्यालोकः,* चौखम्बा संस्कृत सिरिज अफिस ।

द्विवेदी, कपिलदेव (ई.१९९२) *संस्कृतनिबन्धशतकम्* (पञ्चम सं.), विश्वविद्यालय प्रकाशन ।

भट्टराई, घटराजः (२०५५) *'संस्कृतका अमर साहित्यकार',* साझा प्रकाशन ।

मम्मटः (ई.१९९४), *काव्यप्रकाशः* (द्वितीय सं.), (व्या.-वासुदेव शास्त्रीअभ्यङ्कर),चौखम्बा विद्याभवन ।

मिश्रः, रामचन्द्रः (ई.२०१०) *संस्कृतसाहित्येतिहासः,* चौखम्बा विद्याभवन ।

विश्वनाथः (ई.१९९५), *साहित्यदर्पणः* (पञ्चम सं.), कृष्णदास अकादमी ।

शुक्लः, रमेशचन्द्रः (२०२३), *प्रबन्धरत्नाकरः,* चौखम्बा विद्याभवन ।

सहाय, राजवंश (सम्पा. ई.२००२), *संस्कृत साहित्य-कोश* (चतुर्थ सं.), चौखम्बा विद्याभवन ।

सुवेदी, कपिलदेव (ई.२०१५), *प्रौढरचनानुवादकौमुदी* (बाइसौं सं.), विश्वविद्यालय प्रकाशन ।

हर्षवर्द्धनः (ई.१९७६) *रत्नावलीनाटिका* (द्वि.सं.), मोतीलाल बनारसीदास ।